# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## संज्ञाप्रकरणम् (४)

२१.०७.२०१०

# पुनरावर्तनम्

- हलन्त्यम्,
- आदिरन्त्येन सहेता,
- उपदेशेऽजनुनासिक इत्,
- प्रत्याहारनिर्माणम्

# ३. उपदेशोऽजनुनासिक इत् (१.३.२)

- चत्वारि पदानि । उपदेशे, अच्, अनुनासिकः, इत् ।
- उपदेशे अनुनासिकः अच् इत्संज्ञः स्यात् ।
- प्रतिज्ञानुनासिक्याः पाणिनीयाः ।
- लण्सूत्रस्थ-अवर्णेन सह उच्चार्यमाणः रेफः रलयोः संज्ञा ।
- रप्रत्याहारः – उरण् रपरः ।

- प्रत्याहारेषु इतां न ग्रहणम् । 'अनुनासिकः' इत्यादिनिर्देशात् । न ह्यत्र ककारे परेऽच्कार्यं दृश्यते ।
- अनुनास् इ + क – ककारस्य 'अच्' प्रत्याहारे अन्तर्भावे,
- अनुनास् य् + क - 'इको यणचि' इति यणादेशः
- अनुनास् +क – 'लोपो व्योर्वलि' इति यकारस्य लोपः
- अनुनास्कः

- ’आदिरन्त्येन सहेता’ इत्येतत्सूत्रेण कृताः संज्ञाः प्रत्याहारशब्देन व्यवह्रियन्ते ।
- प्रत्याह्रियन्ते = सङ्क्षिप्यन्ते वर्णाः इति प्रत्याहारः ।

# ४. ऊकालोऽज्झ्रस्वदीर्घप्लुतः (१.२.२७)

- त्रीणि पदानि । ऊकालः, अच्, ह्रस्व-दीर्घ-प्लुतः ।
- उश्च ऊश्च उ(३)श्च वः । वां काल इव कालः यस्य सोऽच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् ।
- उ+ऊ = ऊ (अकः सवर्णे दीर्घः)
- ऊ+उ(३) = ऊ (अकः सवर्णे दीर्घः)
- अतः, उ+ऊ+उ(३) = ऊ ।

- ऊ इति प्रातिपदिकम् । तस्य प्रथमाविभक्तौ बहुवचने ’वः’ इति रूपम् । अत एव उश्च ऊश्च उ(३)श्च वः ।
- ’ऊ’ इत्यस्य षष्ठीबहुवचने ’वाम्’ इति रूपम् । अतः वाम् = त्रयाणाम् उकाराणां कालः=उच्चारणकालः इव कालः = उच्चारणकालः यस्य सः अच् क्रमात् ह्रस्व-दीर्घ-प्लुतसंज्ञः स्यात् इत्युच्यते ।

- उकारोच्चारणकालसदृशः कालः यस्य वर्णस्य उच्चारणार्थम् अपेक्षितः सः स्वरः ह्रस्वः ।
- ऊकारोच्चारणकालसदृशः कालः यस्य वर्णस्य उच्चारणार्थम् अपेक्षितः सः स्वरः दीर्घः ।
- उ(३)कारोच्चारणकालसदृशः कालः यस्य वर्णस्य उच्चारणार्थम् अपेक्षितः सः स्वरः प्लुतः ।

- सः प्रत्येकम् उदात्तादिभेदेन त्रिधा –

# ५. उच्चैरुदात्तः (१.२.२९)

- पदद्वयम् । उच्चैः, उदात्तः ।
- ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्वभागे निष्पन्नः अच् उदात्तसंज्ञः स्यात् ।
- आ ये ।

# ६. नीचैरनुदात्तः (१.२.३०)

- पदद्वयम् । नीचैः, अनुदात्तः ।
- **स्पष्टम् ।** ताल्वादिषु सभागेषु स्थानेषु अधोभागे निष्पन्नः अच् अनुदात्तसंज्ञः स्यात् ।
- अ॒र्वाङ्
- लेखनावसरे अनुदात्तस्वरः अधोरेखाङ्कितो भवति ।

# ७. समाहारः स्वरितः (१.२.३१)

- पदद्वयम् । समाहारः, स्वरितः ।
- उदात्तत्व-अनुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सः अच् स्वरितसंज्ञः स्यात् ।
- लेखनावसरे स्वरितस्वरः उपरि रेखाङ्कितो भवति ।

# ८. तस्यादित उदात्तमर्धह्रस्वम् (१.२.३२)

- चत्वारि पदानि । तस्य, आदितः, उदात्तम्, अर्धह्रस्वम् ।
- ह्रस्वग्रहणमतन्त्रम् । स्वरितस्य आदौ अर्धम् उदात्तं बोध्यम् । उत्तरार्धं तु परिशेषादनुदात्तम् ।
- तस्य च उदात्तस्वरितपरत्वे श्रवणं स्पष्टम् । अन्यत्र तु उदात्तश्रुतिः प्रातिशाख्ये प्रसिद्धा ।